**अग्रनासिका** स्त्री अग्रा नासिका अग्रहस्तवत् क० । नासिकाग्रभागे ।

**अग्रन्थिक** पु० नास्ति ग्रन्थिर्वस्त्रग्रन्थिः संसारबन्धग्रन्थिर्वाऽस्य । निर्ग्रन्थिके मुक्तकच्छे जैनभेदे आत्मज्ञे च "भिद्यते हृदयग्रन्थि" रित्यनेन तस्य संसारग्रन्थिशून्यत्वोक्तेस्तथात्वम् । ग्रन्थिशून्ये त्रि० ।

**अग्रपर्णी** स्त्री अग्रे पर्णं यस्याः जातित्वात् ङीप् । (आल्कुशीति) ख्याते वृक्षे ।

**अग्रपूजा** स्त्री अग्रे पूजा । प्राथमिकपूजायाम् । "अग्रेपूजामिह स्थित्वा गृहाणेमामिति" पुरा० ।

**अग्रभाग** पु० भज्यते इति भागः एकदेशः भज-घञ् अग्रः पूर्व्वः भागः कर्म्म० । श्राद्धादौ प्रथममुद्धृत्य देये द्रव्ये अवयविनः शेषभागे च । यथा शराग्रभागः ।

**अग्रभुक्** त्रि० अग्रे देवपित्रादिभ्योऽदत्त्वा भुङ्क्ते भुज-क्विप् ७त० । औदरिके ।

**अग्रभू** पु० अग्रे भवति उत्पद्यते भू-क्विप् ७त० । पूर्वजाते ज्येष्ठभ्रातरि विप्रे च ज्येष्ठभगिन्यां स्त्री । पूर्वजाते त्रि० ।

**अग्रमहिषी** स्त्री कर्म० । प्रधानस्त्रियाम् । "अथाग्रमहिषी राज्ञ" इति ।

**अग्रमांस** न० अग्रं प्रधानं भक्ष्यत्वेन मन्यते मन्-स, दीर्घः कर्म्म० । हृदयस्थे पद्माकारे (फुलका) इति नामके मांसे । केचित् व्युक्काग्रमांसमेकं नामेत्याहुः । (अग्रमास) इति प्रसिद्धे रोगभेदे च ।

**अग्रमुख** न० अग्रं मुखम् अग्रहस्तवत् कर्म्म० । मुखाग्रे ।

**अग्रयण** न० अग्रमयनात् उत्तरायणात् णत्वम् शक० तत्विधानकालोऽस्य अच् । मार्गे मासि साग्निककर्त्तव्येनवशस्येष्टिरूपे यज्ञभेदे । निरग्निकर्त्तव्ये नवान्नश्राद्धे च । "अकृताग्रयणञ्चैव धान्यजातं द्विजोत्तमेति" वज्जयेदिति स्मृतिः । "अकृताग्रयणमकृतनवशस्येष्टिश्राद्धं यथायोग्यं साग्निकनिरग्निपरमिति" श्राद्धतत्त्वे रघुनन्दनः ।

**अग्रयान** न० अग्रे यानं यस्य या-ल्युट् संज्ञात्वेऽपिणत्वम् । पुरोगामिनि सैन्ये । अग्रगामिमात्रे त्रि० ।

**अग्रयायिन्** त्रि० अग्रे यास्यति या-णिनि ७त० । पुरोगामिनि "पुत्त्रस्य ते रणशिरस्ययमग्रयायीति" श्रेष्ठे च ।

**अग्रयोधिन्** पु० अग्रे स्थित्वा युध्यति युध-णिनि ७त० । सैन्यानामग्रे स्थित्वा योद्धरि । [चिल्लोति प्रसिद्धे शाकभेदे ।

**अग्रलोहिता** स्त्री अग्रमुपरिभागः लोहितं यस्याः ब० ।

**अग्रवीज** पु० अग्रं शाखाग्रं वीजमुत्पादकं यस्य । छिन्नाग्रतत्खण्डरूढे (कलम) इतिप्रसिद्धे काण्डजाते कुरण्टकादिवृक्षे ।

**अग्रसन्धानी** स्त्री अग्रे फलोत्पत्तेः प्राक सन्धीयते ज्ञायतेऽनया कार्य्यं सम्+धा-करणे ल्युट् ङीप् । यमपञ्जिकायाम् । यत्र हि प्राणिवर्गस्य प्राग्भवीयकर्म्मानुसारेण शुभाशुभसूचकं सर्व्वं लिख्यते सा यमपञ्जिका, । केश्चित् यमपट्टिकेति सा कथ्यते । अग्रसन्धानकारिणि त्रि० ।

**अग्रसन्ध्या** स्त्री अग्रं सन्ध्यायाः, "सर्वोऽप्येकदेशः कालवाचिना समस्यते, इत्युक्ते एक०त० । सन्ध्यापूर्व्वसमये । अग्रा पूर्व्वा सन्ध्या इति कर्म० । प्रातःसन्ध्यायाम् "कर्कन्धूनामुपरि तुहिनं रञ्जयत्यग्रसन्ध्येति" शकुन्तला ।

**अग्रसर** त्रि० अग्रे सरति गच्छति सृ-ट ७त० । अग्रगामिनि । "युद्धायाग्रसरोऽभवदिति" स्त्रियां ङीप् ।

**अग्रसारा** स्त्री अग्रं शीर्षमात्रं सारोऽस्याः । फलशून्यशिखायां मञ्जर्य्याम् । अग्रात् अग्रमारभ्य सारोऽस्य । वंशादौ पु० ।

**अग्रह** पु० ग्रहः परिग्रहः न०त० । परिग्रहाभावे । बहु० । परिग्रहशून्ये सन्यासिप्रभृतौ, ज्ञानशून्ये त्रि० ।

**अग्रहर** त्रि० अग्रे ह्रियते दीयतेऽसौ अग्र-हृ-अच् । अग्रदेये वस्तुनि, भागाग्रे पु० अग्र-हृ-कर्त्तरि अच् । अग्रहारिणि त्रि० "प्राग्रहरः कुमार" इति ।

**अग्रहस्त** पु० अग्रश्चासौ हस्तश्चेति गुणगुणिनोरभेदात् कर्म्म० । हस्तस्याग्रभागे "अथाग्रहस्ते मुकुलीकृताङ्गुलाविति" कु० ।

**अग्रहायण** पु० अग्रः श्रेष्ठः हायनो व्रीहिरत्र णत्वम् । मार्गशीर्षे मासि । तस्य च "मासानां मार्गशीर्षोऽस्मीति" गीतायां भगवद्विभूतिरूपत्वोक्तेः श्रेष्ठधान्यवत्त्वाच्च तथात्वम् ।

**अग्रहायणेष्टि** स्त्री अग्रा प्राथमिकी हायननिमित्ता इष्टिः । नवशस्येष्टौ यागभेदे ।

**अग्रहार** पु० अग्रं प्रथमं ह्रियते उत्पन्नशस्यादुद्धृत्य स्थाप्यते हृ-कर्म्मणि घञ् । क्षेत्रोत्पन्नशस्यादुद्धृत्य ब्राह्मणोद्देशेन स्थाप्ये धान्यादौ गुरुकुलादावृत्तब्रह्मचारिणे देये क्षेत्रादौ, ग्रामभेदे च "स कस्मिंश्चिदग्रहारे कालो नामैकस्येति" दशकु० । अग्रं हरति-अण् । अग्रहारके त्रि० ।

**अग्राक्षि** न० अग्रञ्च तदक्षि नेत्रं चेति गुणगुणिनोरभेदात् कर्म्म० स्वाङ्गपरत्वात् नाच्समा० । नेत्राग्रे अपाङ्गे "अग्राक्ष्णा वीक्षमाणस्तु तिर्य्यग्भ्रातरमब्रवीदिति रामा० ।

**अग्रानीक** न० अग्रञ्च तदनीकं चेति गुणगुणिनोरभेदात्